नामिव द्विपैः (? द्विपे) YaśasCam. ii. 270. 13; अज्ञातपरमार्थोऽसि तद्विदित्वा जिनागमम् ।…परिव्रज्यां त्वमाश्रये: PārśvC. 6. 1276; अज्ञातपरमार्थो हि स्तौति वैषयिकं सुखम् NemiC. 9. 20; तत्क्षन्तव्यं त्वयाज्ञातपरमार्थेन यन्मया । निदेशितोऽसि देशस्य त्यागे साधुधुरंधर: SamarāSaṁ. 2. 221; एकदा च यशश्चन्द्रगणिना प्रत्युपेक्षितम् । आसनं हेमसूरीणाम् …। अज्ञातपरमार्थेन तद् दृष्ट्वायुक्ति भूभुजा KumāDeC.(So.) 18. 15.

**अज्ञातपरमार्थ** (ajñāta-paramārtha) *m.* unknown truth (नमस्ते) अज्ञातपरमार्थाय परमार्थविबोधिने PadmP.(Ra.) 9. 181; ननु प्रथममज्ञातपरमार्थे कथमभिलषणम् AbhinBhā. i. 13. 17 (*on* 1. 14)

**अज्ञातपरमार्थक** (ajñātaparamārtha-ka) *adj.* who did not know the truth अज्ञातपरमार्थकैः । तैरिदं कल्पितं तीर्थं कातरैः BṛKathāK. 131. 68.

**अज्ञातपरमार्थत्व** (ajñātaparamārtha-tva) *n.* the state of not knowing the truth शोच्यः कार्पटिकस्त्वेष यमाह्वैवमादरात् । मातुलुङ्गमिमं दत्तं तुष्टेनानेन भूभृता ।…इति सर्वेऽपि…विषादिनः । अज्ञातपरमार्थत्वात्स्वैरमूचुः परस्परम् KathāSaSāg. ix. 3. 36.

**अज्ञातपरस्परवियोग** (ajñāta-parasparaviyoga) *adj.* in which mutual separation is not known अज्ञातपरस्परवियोगं भोगमु(? सु)खमुपभुञ्जानयोः TilaMañ. 343. 16.

**अज्ञातपरानुवर्तना** (ajñāta-parānuvartanā) *adj.* (*f.*) unaware of imitating others दृशमस्य तृणीकृतामरां गिरमज्ञातपरानुवर्तनाम् ।…परिपश्यन्नृपतिर्विसिष्मिये S'ivLī. 15. 59.

**अज्ञातपरिच्छित्ति** (ajñāta-paricchitti) *f.* correct knowledge of the unknown अज्ञातपरिच्छित्तिरेव प्रमा PramāLa. 2B. 11 (comm. परिच्छित्तिरिति यथार्थज्ञानमुच्यते । अज्ञातेति स्मृतिसाधनव्युदासार्थम्)

**अज्ञातपरिमाण** (ajñāta-parimāṇa) *adj.* 1 extent of which is not known न चाज्ञातपरिमाणादर्थावगतिः सम्भवति, अतो दध्यत्रेति सर्वमिदमेकं पदं न भेद इति NyāyRa. 906. 11 (*on* 7. 217); 2 of unknown number कथंभावापेक्षितापूर्वोपकारस्याज्ञातपरिमाणाङ्गसाध्यत्वात् TantrVā. 119. 9 (*on* i. 3. 5); अज्ञातपरिमाणेऽपि बाहुल्यमात्रेण लोके अपरिमितशब्दप्रयोगात् बाहुल्ये शक्तिः BhāṭṭDī. ii. 322. 20 (*on* vi. 7. 10); MayūMāli. 514. 5 (*on* vi. 7. 10)

**अज्ञातपरिश्रम** (ajñāta-pariśrama) *adj.* who has not felt fatigue नरवाहनदत्तः …। प्राक्रामत्पथि तस्मिन्नज्ञातपरिश्रमः स तत्सहितः KathāSaSāg. vii. 8. 223.

**अज्ञातपात** (ajñāta-pāta) *adj.* whose alighting or falling is not noticed अज्ञातपातः प्रतिहारपालैः … लङ्काधिपस्य प्रसभं पुरोऽभूत् (अङ्गदः) RāmC. 27. 73; लोलकल्लोलकीलालकूलिनीमेत्य पत्तिभिः । लेभे मरणमज्ञातपातैर्निर्मज्य कैश्चन PāṇḍaC. 13. 448.

**अज्ञातपातम्** (ajñāta-pātam) *adv.* without the fall being noticed तदस्य जैत्राभरणं विहर्तुरज्ञातपातं सलिले ममज्ज RaghuVa. 16. 72.

**अज्ञातपाप** (ajñāta-pāpa) *adj.* whose sin is not known अनाविष्कृतपापाः तत्पापहेतुकर्माविनाभूतव्यतिरिक्तैरज्ञातपापाः ManvaVi. 1457. 7 (*on* 11. 226); *n.* unintentional sin (गृही) अज्ञातपापैः प्रमुच्यते ManvaMu. 177. 30 (*on* 4. 181); ज्ञाताज्ञातपापक्षयकामोऽष्टोत्तरसहस्रसावित्रीजपमहं करिष्ये TantrSā.(K.) 41. 11.

**अज्ञातपार** (ajñāta-pāra) *adj.* whose other shore is not known, boundless अज्ञातपारे…स्वानन्दैकरसे निमग्नमनसां न त्वं न चाहं जगत् PraboSu. 165.

**अज्ञातपारार्थ्य** (ajñāta-pārārthya) *n.* unknown subordination एवं चाज्ञातपारार्थ्ये नार्थवादः फलश्रुतिः BṛĀraUBhVā.(Sambandha.) 434.

**अज्ञातपारावार** (ajñāta-pārāvāra) *adj.* to whom the ocean is unknown (one who has not known the ocean) वयमज्ञातपारावारा गोपायन्तः क्वचिदात्मानं गोविन्दमेव निरन्तरमनुसंदधीमहि NīlaVi. 76. 15.

**अज्ञातपारुष्यता** (ajñātapāruṣya-tā) *f.* the state of not knowing harshness राज्ञीमज्ञातपारुष्यतयादूषितभक्तयः । अनुसस्त्रुश्चतस्त्रस्ताः परिवारवरस्त्रियः RājTa.(Ka.) 8. 1223.

**अज्ञातपितृक** (ajñātapitṛ-ka) *adj.* whose father is not known अज्ञातपितृको यश्च कानीनोऽनूढमातृकः NāraSm. 194. 18; स्वयं च अज्ञातपितृकः S'rīBh. 169. 4 (*on* i. 1. 4)

**अज्ञातपितृवंश** (ajñāta-pitṛvaṁśa) *adj.* who does not know the paternal lineage अज्ञातपितृवंशो यो दूरादपि समागतः । सामान्यं वांछते पद्यम् SkandP. vi. 201. 8.

**अज्ञातपितृवर्ग** (ajñāta-pitṛvarga) *adj.* who does not know the paternal ancestors नागरस्य…अज्ञातपितृवर्गस्य सामान्यं पदमिच्छतः SkandP. vi. 201. 4.

**अज्ञातपित्रादिनामक** (ajñātapitrādināma-ka) *adj.* who does not know the names of one's father etc. (i. e. grandfather and great grandfather) अज्ञातपित्रादिनामका ये तेषामेतैः शब्दैः श्राद्धादि चोद्यते ManuBh. i. 291. 5 (*on* 3. 184)

**अज्ञातपीडागमा** (ajñāta-pīḍāgamā) *adj.* (*f.*) who does not know the source of suffering इति । बान्धवजनस्याज्ञातपीडागमे AmaS'. 105; SaraKaṇṭhā. 550. 16; KāvyaPra. 20. 3; SubhāRaK. 25. 1; SaduktiKa. 142. 6; SūktiMu. 48. 2; मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमा वापीं स्नातुमितो गतासि S'ārṅgaPa. 3508; Subhāṣi. 1423.

**अज्ञातपुरुष** (ajñāta-puruṣa) *m.* person whose investment is unknown लाभोनमिश्रराशेः प्रक्षेपकतः फलानि संसाध्य । तेन हृतं तल्लब्धं मूल्यं त्वज्ञातपुरुषस्य GaṇiSāSaṁ. 5. 222.

**अज्ञातपुरुषार्थत्व** (ajñātapuruṣārtha-tva) *n.* the state of being not known and being the goal of life अज्ञातपुरुषार्थत्वाच्छ्रौतत्वात्तत्त्वमर्थयोः NaiṣkaSi. 155. 2 (comm. तत्त्वमर्थयोरन्योन्यविशेषणविशेष्यभावस्याज्ञातत्वे सति पुरुषार्थत्वेन श्रुतितात्पर्यविषयत्वात्)

**अज्ञातपूजा** (ajñāta-pūjā) *f.* worship not known before इति चिन्तयमानानां पार्थो दुःखमपानुदत् । प्राप्तमज्ञातपूजाभिरुत्तमाभिरपूजयत् MahāBhā. i. App. I. 114 (68)

**अज्ञातपूर्व** (ajñāta-pūrva) *adj.* not known before अज्ञातपूर्वाणि न दन्तकाष्ठान्यश्वत्थ पत्रैश्च समन्वितानि BṛSaṁ. 85. 2; YogYā. 2. 20; एते के जगतीरुहो वनजुषाप्यज्ञातपूर्वा मया ĀścaCū. 6. 4; यथैवाज्ञातपूर्वोऽयं भवद्भक्तिरसो मम … स एव परिपुष्यतु Stotrā. 16. 5; महामत्स्योऽज्ञातपूर्वः SkandP. vi. 263. 44; कथमज्ञातपूर्वेण प्रवर्तेथितुर्धर्मेणाव्युत्पन्नो बालः प्रथमं लिङादेः संबन्धं गृह्णाति NyāySu.(So.) 30. 9 (*on* i. 2. 7); (दन्तधावनं) अज्ञातपूर्वं पत्राढ्यं युग्मपर्णं तु वर्जयेत् BṛBrahmaS. iii. 7. 109; अज्ञातपूर्वस्यैव यागस्य फलसम्बन्धकरणेन MīmāKau. i. 223. 16 (*on* i. 4. 8); ननु कथमज्ञातपूर्वे परमेश्वरे प्रत्यभिज्ञा युक्ता Bhāsk. i. 36. 12 (*on* i. 1. 1)

**अज्ञातपूर्वरूप** (ajñātapūrva-rūpa) *adj.* whose form was not known before तं चाज्ञातपूर्वरूपं हास्यजननं दृष्ट्वा सिंहः पृष्टवान् Tantrakhyā. 32. 4.

**अज्ञातपृष्ठभाग** (ajñāta-pṛṣṭhabhāga) *adj.* whose back is never perceived (by enemies) दन्तिनः…अज्ञातपृष्ठ(दानैः ? भागैः)…योधपुरुषैरधिष्ठिता AvantiKa. 96. 4.

**अज्ञातप्रकारत्व** (ajñātaprakāra-tva) *n.* the state of having an unknown nature or type तस्यापि चादृष्टत्वेनाज्ञातप्रकारत्वात्परमापूर्वसिद्धयौपयिकत्वेन … तादर्थ्यमेवावधातादेर्युक्तम् S'āstrDi. 189. 2 (*on* iii. 1. 4)

**अज्ञातप्रकारावच्छिन्न** (ajñātaprakārāvacchinna) *adj.* delimited by unknown adjunct केवलकिञ्चित्पदस्याज्ञातप्रकारावच्छिन्ने शक्तिः BhāṭṭCin. i. 127. 14 (*on* i. 1. 4)

**अज्ञातप्रकृति** (ajñāta-prakṛti) *adj.* whose origin is not known अज्ञातमज्ञातप्रकृतिमांसम् ManvaVi. 1422. 7 (*on* 11. 155)

**अज्ञातप्रतिविधान** (ajñāta-pratividhāna) *adj.* not knowing how to counteract शठमृगयुः कुसृतिशरैरज्ञातप्रतिविधानसाधुमृगान् … निघ्नन् न परिश्रमं व्रजति KuṭṭaMa. 710.

**अज्ञातप्रतीकारत्व** (ajñātapratīkāra-tva) *n.* the state of having unknown remedies मिथ्याज्ञानस्य च सम्यग्ज्ञानं प्रतिपक्षः प्रतिपक्षभावनाभ्यासेन च समूलमुन्मूलयितुं शक्यन्ते दोषा इति नाज्ञातप्रतीकारत्वं तेषाम् NyāyMañ. ii. 86. 8.

**अज्ञातप्रतीति** (ajñāta-pratīti) *f.* apprehension of what was unknown अज्ञातप्रतीतिश्रुतार्थप्रतिष्ठापनवैशद्यरूपकार्यभेदस्य प्रसिद्धत्वात् S'rutaPra. ii. 530. 24 (*on* iii. 3. 56)

**अज्ञातप्रत्यक्षसिद्धहेतुक** (ajñātapratyakṣasiddhahetu-ka) *adj.* not having a known cause which is perceptible तस्मात् स स विचित्रनीलपीतादिरूप आकस्मिकोऽज्ञातप्रत्यक्षसिद्धहेतुकः सन् PratyabhiVi. i. 212. 1 (*on* i. 5. 4)

**अज्ञातप्रभुका** (ajñātaprabhu-kā) *adj.* (*f.*) whose master is unknown नाह्वानयेन्नृपः । … सर्ववर्णोत्तमां कन्यां नाज्ञातप्रभुकास्त्रियः S'ukraNī. iv. 5. 101.

**अज्ञातप्रमदासङ्ग** (ajñāta-pramadāsaṅga) *adj.* not knowing (having) contact with women अज्ञातप्रमदासङ्गमाकुलीभूतमानसम् । कुरु नागरकं तावत्त्वं माम् BṛKathāS'loSaṁ. 11. 66.

**अज्ञातप्रमाकरणत्व** (ajñātapramākaraṇa-tva) *adj.* the state of being an instrument of valid knowledge itself being not known अज्ञातप्रमाकरणत्वस्य भावत्वविशेषितस्येन्द्रियत्वनिरुक्तेः सम्भवात् KhaṇḍanKhā. 583. 16.

**अज्ञातप्रमेयसिद्धि** (ajñātaprameya-siddhi) *f.* establishment of an object which was not known अज्ञातप्रमेयसिद्धये हि प्रमाणं मृग्यते SarvaDaKau. 64. 17.